No. १३१२

Title विशिष्ट वैशिष्ट्य बोध विचारः

Author रघुदेव भट्टाचार्यः

Extent २० Age १८१२

Subject न्यायशास्त्रं

विशिष्टवैशिष्ट्यबोधविचारः

१३१२

न्याय विशिष्टवैशिष्ट्य

११०४

विशि ॥ श्रीगणेशाय नमः ॥ ॥ श्रीशिवो विजयते ॐ विशेषणतावच्छेदकप्रकारकनिर्णयजन्यकाले विशिष्टवैशि
॥१॥ ष्ट्यबोधापत्तिनिवारणाय विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुता कल्प्यते। तद्धे
तुता च न सामान्यतो विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन। सर्वसा
धारणविशिष्टवैशिष्ट्यबोधत्वस्य विशेषणतावच्छेदकप्रकारकनिर्णयत्वस्यैक्याभावात्। एकविशेषणतावच्छेदक
प्रकारकज्ञानादपरविशिष्टवैशिष्ट्यबोधापत्तेश्च। किंतु रक्तत्वविशिष्टदंडादिवैशिष्ट्यावगाहिज्ञानत्वावच्छि
न्नं प्रति दंडत्वावच्छिन्नविशेष्यताकरक्तत्वप्रकारकनिर्णयत्वेन विशिष्यैव हेतुता। न च विशेष्ये विशेषणं तत्रापि
च विशेषणांतरमिति रीत्या रक्तत्वविशिष्टो यो दंडस्तन्निरूपितसंयोगादिरूपवैशिष्ट्यावगाहितया तत्र व्यचा
र इति वाच्यं रक्तत्वदंडत्वोभयावच्छिन्नप्रकारताकत्वस्यैव तदर्थत्वात्। विशेष्ये विशेषणमित्यादिक्रमेण र
क्तत्वादिविषयकज्ञानीयदंडादिप्रकारतायां रक्तत्वाद्यनवच्छिन्नतया तत्र व्यभिचाराभावात्। केचित्तु रक्तत्ववि
शिष्टदंडादौ पुरुषादिविशेष्यतानिरूपितप्रकारतायाः पर्याप्तिः विशिष्टवैशिष्ट्यबोधस्थले स्वीक्रियते। तथा श्री
च नादृशविशिष्टपर्याप्तप्रकारताकत्वमेव दंडो रक्त इत्यादिनिर्णयजन्यतावच्छेदकं उपयते। विशेष्ये विशे १

षणमितिरीत्या रक्तादिविषयकज्ञाने पुरुषादिविशेष्यतानिरूपितप्रकारतायाः शुद्धदण्डत्वपर्याप्ततया न तत्र व्यभि
चार इत्याहुः ॥ तदसत् ॥ तथा सति दण्डांशे रक्तत्वभ्रमात्मकस्य रक्तदण्डवानयमिति ज्ञानस्य विशिष्टवैशिष्ट्यबोध
त्वानापत्तेः । तत्र रक्तत्वविशिष्टदण्डाभावात् । पर्वतो लोहितवह्निमानित्यादिज्ञाने लोहितत्वविशिष्टवह्नेरप्रसिद्ध्याः व्याप्ति
रेव । नच विशिष्टाप्रसिद्धावपि खण्डशः प्रसिद्धयोः लोहितत्ववह्न्योरेव प्रकारतायाः पर्याप्तिः स्वीक्रियते । कापर्यन्ता
वच्छेदकमपि लोहितत्ववह्न्युभयपर्याप्तप्रकारकत्वमेवेति नानुपपत्तिरिति वाच्यम् । पर्वतादिविशेष्यतानिरूपितप्रका ता ५
रतायां लोहितत्वांशे स्वीकारे लोहितत्वाभाववान् पर्वत इत्याकारकबाधबुद्धिदशायां पर्वतो लोहितवह्निमान् पर्वत इति वि
वैशिस ५ शिष्टबुद्ध्यनुत्पत्त्यापत्तेः । तन्मते लोहितवह्निमानित्येतादृशविशिष्टवैशिष्ट्यबुद्धेरपि लोहितत्वनिष्ठप्रकारतानि
रूपितपर्वतत्वविशेष्यताशालित्वेन तत्र तादृशबाधबुद्धेर्विरोधित्वात् । तथा च विशिष्टवैशिष्ट्यबोधविशेषणता स्थाते ८
वच्छेदकविशेषणयोर्नैकप्रकारता पर्याप्ता ॥ किन्तु विशेषणनिष्ठप्रकारताविशेषणतावच्छेदकावच्छिन्नत्वेवेति
विशेष्य विशेषणं तत्रापि च विशेषणं तत्र मितरत्र तु विशेषणतावच्छेदकप्रकारतानिरूपितैव नेत्थं विशेषणता
वच्छेदकावच्छिन्नाइ इति तयोर्भेदः । अथ रक्तत्वदण्डत्वोभयधर्मावच्छिन्नप्रकारताकत्वस्य दण्डो रक्त इति नि

र्णयजन्यतावच्छेदकत्वेपि रक्तत्वधर्मितावच्छेदककदंडत्वप्रकारकनिर्णयजन्यदंडरक्तत्वानितिविशिष्टवैशिष्ट्यबोधेव्यभि
चारो दुर्वारः। तत्रापि दंडनिष्ठप्रकारताया दंडरक्तत्वोभयावच्छिन्नत्वात्। न च रक्तत्वप्रकारतानिरूपितदंडत्वावच्छि
न्नविशेष्यताशालित्वस्य तादृशनिर्णयजन्यतावच्छेदके प्रवेशान्न व्यभिचार इति वाच्यं। तादृशबोधेनैव यत्र
विशेष्ये विशेषणमिति रीत्या येन दंडत्वावच्छिन्ने रक्तत्वविषयीकृतं तत्र तादृशसमूहालंबने च व्यभिचारस्य दु
र्वारत्वादिति चेन्न। रक्तदंडवानिति तादृशज्ञानीयतादृशोभयधर्मावच्छिन्नदंडप्रकारताया एव रक्तत्वप्रका
रतानिरूपितविशेष्यतास्वरूपत्वाभ्युपगमात्। रक्तत्वप्रकारतानिरूपितदंडत्वावच्छिन्नविशेष्यताभिन्न
खंडं १ रक्तत्वावच्छिन्नप्रकारताया एव दंडो रक्त इति तादृशनिर्णयजन्यतावच्छेदकत्वाभ्युपगमेन तत्र व्यभिचारान
वकाशात्। तादृशसमूहालंबनबोधीयोभयधर्मावच्छिन्नविषयताया दंडत्वप्रकारतानिरूपितरक्तत्वावच्छि
न्नविशेष्यतारूपाया रक्तत्वप्रकारतानिरूपितदंडत्वावच्छिन्नविशेष्यत्वभिन्नत्वात्। न च रक्तत्वावच्छिन्नप्र
कारताया रक्तत्वप्रकारतानिरूपितविशेष्यतारूपत्वेन रक्तदंडवानिति बोधस्य रक्तत्वावच्छिन्नविशेष्य श्री
तानिरूपितरक्तत्वप्रकारताशालित्वप्रसंगः। तथा च तादृशज्ञानात् रक्तत्वावच्छिन्नविशेष्यताकरक्त २

(३ आदृशस्मरणे प्रतीच)

त्वप्रकारकरक्तोरक्त इत्साकारकस्मरणप्रसंगः। तत्र तथाविधनिर्णयस्य हेतुत्वादिति वाच्यं। रक्तत्वावच्छिन्नविशेष्यता
यास्तत्र रक्तत्वप्रकारतानिरूपितत्व[redacted]पि रक्तत्वावच्छिन्नविशेष्यतात्वेन तत्साक्षात्तादृशप्रकारतानिरूपितत्वा
नभ्युपगमात्। तन्निरूपेण रक्तत्व प्रकारतानिरूपित[redacted]विशेष्यताशालिज्ञानस्यैव च रक्तो रक्त इत्साकारकस्म
तिजनकतया तत्तस्मात्तादृशस्मरणापत्त्यसंभवाच्च॥ एकसंबंधेन रक्तत्वप्रकारकनिर्णयसत्त्वे संबंधान्तरेण रक्तत्व
विशिष्टवैशिष्ट्यावगाहिज्ञानवारणाय विशेषणतावच्छेदकीयसंबंधविषयतां निवेश्य पतद्देन विभिन्नकार
णतारक्त्वं। एवं रक्तदंडवत्पुरुषवानयमित्साकारकविशिष्टवैशिष्ट्यबोधे रक्तदंडवान्पुरुष इत्यादिनिर्णय
त्वेन हेतुता। तत्र च दंडांशे रक्तत्वांशे च निर्णयत्वं निवेश्यं। एवमन्यत्रापि तु ह्यं। दंडवान् इत्साकारकविशेष
क ४ णतावच्छेदकांशे निर्द्धर्मितावच्छेदकदंडत्वादिविशिष्टवैशिष्ट्यबोधं प्रति निर्णयत्वमनिवेश्य पदंडत्वप्रका
रकज्ञानत्वेनैव हेतुता। निर्द्धर्मितावच्छेदकसंशयाभावेन तत्र निर्णयत्वनिवेशप्रयोजनविरहात्। न चैवं तु
ता च दंडत्वादिनिर्विकल्पदशायां तादृशविशिष्टवैशिष्ट्यबोधवारणाय। एवं दंडो रक्तो न वेति संशयानंतर
रं एकविशेषणविशिष्टे परविशेषणवैशिष्ट्यमिति रीत्या रक्तदंडः प्रमेय इत्यादिबोधवारणाय तादृश

स्यहेतुतास्वीकार्या न हेतुतापि दंडत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वप्रकारताशालिनिर्णयत्वेन जन्यतावच्छेदकं च रक्त १

वि॰शि॰ विशिष्टवैशिष्ट्यबोधे विशेष्यतावच्छेदकप्रकारकनिर्णयत्वविशिष्टदंडत्वाद्यवच्छिन्नविशेष्यताशालिज्ञानत्वं तेन प्रमेय
३ त्वादिकं अवगाहमानेऽपि एकत्रद्वयमिति रीत्या तथाविधज्ञानस्य दंडनिष्ठविशेष्यतानिरक्तत्वावच्छिन्नेति न तत्
3 त्रव्यभिचारः। न च प्रमेयत्वप्रकारतानिरूपितदंडनिष्ठविशेष्यतायारक्तत्वाद्यनवच्छिन्नत्वेन रक्तत्वधर्मिता
वच्छेदकीभूतप्रमेयत्वादिबाधकालेन तथाविधज्ञानापत्तिरिति तादृशविशेष्यतायारक्तत्वा [redacted]
~~नरक्तत्वधर्मितावच्छेदकीभूतप्रमेयत्वादिबाधकालेन तथाविधज्ञानापत्तिरिति~~ [redacted]
वच्छिन्नत्वमावश्यकमिति वाच्यं। एवमपि प्रमेयत्वादिप्रकारतानिरूपितदंडत्वाद्यवच्छिन्नविशेष्यताभि
न्नायाः एव रक्तत्वावच्छिन्नविशेष्यताया अभ्युपगमात्। एकस्यां विशेष्यतायां रक्तत्वदंडत्वोभयधर्मानवच्छि
न्नत्वेन व्यभिचारानवकाशात्। तत्रापि रक्तत्वधर्मितावच्छेदकक दंडप्रकारकनिर्णयजन्ये दंडो रक्तः प्र त्वे॰
मेय इत्येतादृशबोधे व्यभिचारवारणाय मादृशविशेष्यतायां रक्तत्वप्रकारतानिरूपितदंडत्वावच्छिन्नविश
ष्यताभिन्नत्वं निवेशनीयं। इदंत्वबोध्यं। रक्तदंडवान् रक्तो दंडः प्रमेय इत्याकारकोभयविशिष्टवैशिष्ट्यबो श्री
धसाधारणरक्तत्वविशिष्टदंडत्वाद्यवच्छिन्नविषयताशालिज्ञानत्वावच्छिन्नं प्रतिदंडो रक्त इत्येतादृशाति ३

र्णयत्वादिनाएकमेव हेतुत्वं कल्प्यते। कदाचिन्नाहृशविशिष्टधर्मावच्छिन्नप्रकारताशालिज्ञानं कदाचित्ताहृशविशे
ष्यताशालिज्ञानं उत्पद्यते इत्यत्र विनिगमकगवेषणा चाभयमभवादिनामपीति। एतेन नन्वेवं यथाप्रतिबंधि विशिष्ट
वैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नं प्रतितद्विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुतया नाहृशविशिष्ट
वैशिष्ट्यबोधे नाहृशप्रत्यक्षे चाप्रतिव्याप्तिः तेन न वह्निव्याप्यधूमवान्पर्वत इत्याकारकविशेषणतावच्छेदकप्रका
रकनिर्णयत्वेन हेतुतामादाय वह्निव्याप्यधूमवत्पर्वतवान्देश इत्यादिविशिष्टवैशिष्ट्यबोधे प्रतिव्याप्तिमुद्भावयतोदी
धितिकृतमत्र यथाविधविशेष्यतावच्छेदकप्रकारकनिर्णयत्वेन हेतुतामादाय वह्निव्याप्यधूमवान्पर्वतोद्दव्यमितपा
कास्य विशिष्टवैशिष्ट्यमिति न्यायेन विषयताशालिबोधे प्रतिव्याप्तेरनुद्भावनेन न्यूनतापरिहृता। उपदर्शितरी
त्या एककार्यकारणभावकल्पनेनैव निर्वाहे विशिष्टवैशिष्ट्यमिति न्यायेन विषयताशालिबोधे विशेष्यताव
च्छेदकप्रकारकनिर्णयत्वेन हेतुतायाः स्वातंत्र्येणानुपगमात् विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुता
मादाय प्रतिव्याप्त्यभिधानस्येव विशेष्यतावच्छेदकप्रकारकनिर्णयत्वेन हेतुतामादाय प्रतिव्याप्त्यभिधानेनतया
न्यूनताया अभावात् कश्चित्तु विशेष्यतावच्छेदकवद्भिन्नत्वविशिष्टसंबंधनिष्ठसांसर्गिकविषयताविशिष्ट

४ दंडी चैत्रः कुंडलीत्यादौ दंडाद्युपलक्षितानुयोगिककुंडलादि

न्यायेन २ नभ्याजेत्याद्येकदेश ३ निलौकिकानिवार

विश० ४

वैशिष्ट्यमितिन्यायेन विषयता। एकप्रकारतानिरूपितविशेष्यतानिरूपिताऽन्यप्रकारतानिरूपितस्तु द्रुसंबंधनिष्ठसां
सर्गिकी विषयता सैव एकत्र द्वयमिति रीत्या विषयता। अत एव दंडेन गामानयेति वाक्यानि वेदिककर्मत्वकारिकातात्पर्य
विषयीभूतस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकांक्षादिमत्पदकदंबकत्वात्। घटमानयेतिवदिति वैशेषि
कानुमाने पदार्थे तात्पर्यविषयत्वविशेषणमंगीकृत्योपाध्यायसमते दूषणज्ञानप्रस्तावे एवं विशिष्टे वैशिष्ट्य
मेकत्र द्वयमित्यादिसंसर्गभेदेऽपि दृष्टव्यमित्यादिपक्षधर्मिशोक्तमर्थांतरदूषणमपि साधु संगच्छते। अन्यथा
पूर्वोक्तरीत्या जथाविधविषयतयोर्वैलक्षण्यस्यानंगीकारे [illegible] तथाविधविषयते शाब्दिबोधद्वये एकसंबंधस्यैव भा
नतया विभिन्नसंबंधविषयत्वाभावेन दर्शितपक्षधर्मिशोक्तविरोधोऽवाक्यपरिहार इति। ननु तादृशविशिष्टसं
बंधनिष्ठसांसर्गिकविषयताया एव विशिष्टवैशिष्ट्यमितिरीत्या विषयतात्वेन तथाविधविषयतयोरनुग
मासंभवेन विभिन्नकार्यतावच्छेदकतया विशेष्यतावच्छेदकप्रकारकनिर्णयविशेषणतावच्छेदकप्रका
रकनिर्णययोरेककारणत्वासंभवेन उपदर्शितदीधितिकारस्मृतापि दुःसमाधेयेति किन्न विशेष इति चेन्न श्री
मावानवबाधपूर्वकानुयोगानिरनुयोज्यत्वात्। येन विशेषणतावच्छेदकावच्छिन्नप्रकारतेन विशिष्टस्यैव ४

छिन्न१

शिष्ट्यमितिन्यायेनविषयतेतिनभ्रमः। अपितुविशेषणतावच्छेदकत्वनिरूपितत्वविशिष्टसंबंधनिष्ठसांसर्गिकविष
यतात्मकत्वमिति। तत्रतादृशविषयतयोस्तद्धर्मावच्छिन्ननिरूपितत्वविशिष्टसांसर्गिकविषयतात्वेन अनुग
मेनकार्यतावच्छेदकैक्यसंभवात् विशेषणतावच्छेदकप्रकारकनिर्णयविशेष्यतावच्छेदकप्रकारकनिर्णययोः
कारणताभेदाभावेनकुत्राप्यनुपपत्तेरभावात्। व्यधिकरणसंबंधविषयकविशिष्टवैशिष्ट्यबोधेतत्तद्धर्मविशि
ष्टनिरूपितत्वविशिष्टसंबंधाप्रसिध्यानायंप्रकारसंभवदुक्तिकइतिनसचेतसांशंकास्पदमपि। तत्तद्धर्मनिष्ठाव
च्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितनिरूपितत्वनिष्ठावच्छेदकत्वनिरूपितसंबंधनिष्ठसांसर्गिक
विषयतायाःसंभवत्वादिति। अतएवविशेषणतावच्छेदकांशेभ्रमात्मकविशिष्टवैशिष्ट्यबोधस्थलेतत्रापिनानुप
क ४ पत्तिः। तत्रापिवैज्ञानिकावच्छेदकत्वमादायतथाविधसांसर्गिकविषयतायाःप्रसिद्धिसंभवादित्याहुः। अथघटो
रक्तोनवेत्याकारकसंशयानंतरंरक्तदंडसंदेहीत्याकारकरक्तत्वविशिष्टवैशिष्ट्यावगाह्यनुव्यवसायादयेन
विशिष्टवैशिष्ट्यबोधंप्रतिविशेषणतावच्छेदकप्रकारकनिर्णयत्वेनहेतुत्वकल्पनेनसंभवति। नचतत्रविशे
ष्योविशेषणमितिरीत्यैवअनुव्यवसायोभवतिनत्वसौविशिष्टवैशिष्ट्यविषयताशालीतिनानुपपत्तिरितिवा

(रक्तत्वाभाव ३)

त्वे ३

वि॰ शि॰ चं। विशिष्टवैशिष्ट्यविषयताशून्यज्ञानाद्यनुव्यवसायाभ्युपगमे रक्तः पटो दंडोऽयमित्यादिव्यवसायानंतरमपि विशेष्ये
५ विशेषणमिति रीत्या रक्तदंडं जानामीत्यनुव्यवसायापत्तेरिति चेन्न। दंडो रक्तो न वेत्यादिसंशयानुव्यवसायान ज्ञानां
३३ शरक्तत्वविशिष्टदंडप्रकारकः। किंतु प्रकारितासंबंधेन ज्ञानांशे रक्तत्वप्रकारको दंडे रक्तत्वसंदेहीत्याकार
5 क एव। यदि च तत्र ज्ञानांशे रक्तत्वविशिष्टदंडप्रकारकत्वं तदंशे रक्तत्वप्रकारकोऽप्यनुव्यवसायः स्वीक्रियते।
तथाप्यसौ विशेष्ये विशेषणमिति रीत्यैव जायते। न तु विशिष्टवैशिष्ट्यविषयताशाली। न च पूर्वोक्तति
प्रसंगः। रक्तत्वविशिष्टदंडप्रकारतानिरूपितविषयित्वसामान्यविषयतानिरूपितविशेष्यतासंबंधेन ज्ञा
नुव्यवसायं प्रति रक्तत्वप्रकारतानिरूपितदंडत्वावच्छिन्नविशेष्यतात्वेन हेतुतायाश्चावश्यकत्वात्पू क ५
र्वोक्तसमूहालंबनानंतरं च तथाविधानुव्यवसायासंभवात्। आवश्यकत्वं च तादृशहेतुतायाः रक्तो दंड
इत्याद्याकारकप्रत्यक्षानंतरं यत्र तादृशसमूहालंबनस्मरणादिकं तत्र रक्तदंडं स्मरामीत्यनुव्यवसाया
पत्तिवारणायेति। अथ दंडो रक्त इत्येतादृशज्ञानोपरमेऽपि रक्तदंडं करोमीत्याकारककृतिदर्शनात्क श्री
रोत्स स्याव्यभिचारः। न च तत्र ज्ञानत्वमनिवेश्य दंडत्वावच्छिन्नविशेष्यताकरक्तत्वप्रकारकत्वेनैव हे ५

त्यके १

तत्वान्नव्यभिचारइतिवाच्यंतथासतिइदंडोरक्तइत्याकारकअनुद्बुद्धसंस्कारसत्वेरक्तत्वनिर्विकल्पदशायामपि
विशिष्टवैशिष्ट्यबोधापत्तेः।नचसंस्कारजन्यविशिष्टवैशिष्ट्यबोधेउद्बोधकानांतद्धेतुत्वेनतदभावान्नापत्ति
रितिवाच्यं।उद्बोधकंविनापि[redacted]सामान्यसामग्र्याफलजननेनविशिष्टवैशिष्ट्यबोधसामान्यापादने
उद्बोधकविरहस्याकिंचित्करत्वादितिचेन्न।इतिसाक्षात्कारपूर्वनियमतोइदंडोरक्तइत्याकारकस्मरणा
नुपगमेनव्यभिचारानवकाशात्।वस्तुतस्तुसंस्काराभावत्तज्ज्ञानेच्छावृत्तिवृत्तिजातिविशेषंकल्पयित्वावि
शेषणतावच्छेदकप्रकारकविजातीयगुणत्वेनैवहेतुत्वंस्वीक्रियते।अनन्तस्मृतिव्यक्तीनांहेतुत्वकल्पनापे
क्षयातादृशजातिकल्पनायालाघवोचितत्वात्।नचवृत्तिसाक्षात्कारपूर्वंविषयस्मृतिकल्पनमावश्यकंअन्य रा ५
थोपनायकज्ञानविरहेविषयभानासंभवेनवृत्तिसाक्षात्कारानुदयप्रसंगातइतिवाच्यं।ज्ञानलक्षणाप्रत्या
सत्तेरपिइच्छावृत्तिसाधारणतादृशविजातीयगुणत्वेनैवहेतुत्वोपगमात्।आवश्यकंचगुणमानस
जनकमावृत्तेकत्वयासंस्कारादिव्यावृत्तज्ञानादिविशेषकंनात्रअन्यथासंस्कारादीनांमानसापत्तेरिति।
ननुतथापिविशिष्टवैशिष्ट्यावगाहिस्मरणेव्यभिचारइतिचेन्न।विशिष्टवैशिष्ट्यानुभवत्वंजन्यतावच्छे

ईव्व ९

त्प २

६ दकमात्रस्थीयत्वेन स्मरणे च तादृशसंस्कारस्य च तादृशविषयतानियामक इति बहवः ॥ केचित्तु अनुभवत्वजातौ माना
भावेन ज्ञानत्वस्य नित्यसाधारणतया जन्यतानवच्छेदकत्वात् जन्यप्रत्यक्षेत्रिजो विशेषस्य च विशेषणतावच्छेद गो.२
कप्रकारकनिर्णयजन्यतावच्छेदकः ॥ अनुमित्यादौ च परामर्शादिरेव तादृशविषयतानियामकः । एवं शा
ब्दबोधे वाक्यार्थबोधे पूर्ववत्तथा । अथ विजातीयप्रत्यक्षत्वस्य जन्यतावच्छेदकत्वे इतरव्यापकीभूता
भावप्रतियोगिपृथिवीत्ववती पृथिवीत्याकारकपरामर्शादितरभेदत्वप्रकारकज्ञानदशायामिव तद्वत्ता
वैशेषिक ८ दशायामपि पृथिवी इतरभेदवतीत्याकारकविशिष्टविषयताशालिन्या अनुमितेरापत्तिः । तादृशानुमितेरा
अन्वयव्याप्तिज्ञानस्यैव हेतुत्वान्नापत्तिरिति चेन्न व्यतिरेकेण इतरभेदत्वप्रकारकज्ञानस्य सत्त्वेन तादृशानु
मित्यनुदयापत्तेः । न च पृथिव्यां इतरभेद इत्याकारकानुमितिरेव तत्र जायत इति वाच्यं । साध्याविशेष्यकानु
मितौ साध्यप्रसिद्धेर्विरोधितया तत्र तादृशानुमित्युत्पादासम्भवात् । न च विशेष्ये विशेषणमिति रीत्या पृथि
वी इतरभेदवतीत्याकारिकानुमितिस्तत्र जायत एवेति वाच्यं । तथा सति साध्यज्ञानशून्यकाले तादृशप श्री
रामर्शात् पृथिव्यां इतरभेदः पृथिवी इतरभेदवती इत्याकारकद्विविधविषयताशालिन्या अनुमितेरा ६

पत्तेः। नच विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वान्नापत्तिरिति वाच्यं। एवमपि प्रमेयत्वादिनाइतरभे
दज्ञानकाले तथाविधानुमितेरापत्तिसंभवात्। नच प्रमेयत्वादिना साध्यज्ञानकाले साध्यविशेष्यकानुमितिप्र
तिबंधकीभूतसाध्यसिद्धिसत्त्वेन न तत्र सिद्धिविधेयताशाल्यनुमित्यापत्तिरिति वाच्यं। साध्यतावच्छेदकप्रका
रकसाध्यसिद्धेरेव साध्यविशेष्यकानुमितिविरोधित्वात्। अन्यथा इतरभेदत्वरूपेण भेदांतरावगाहिपृथिव्यामि
चितियाइत्याकारकानुमि ५ तरभेदइत्याकारकसिद्धिकाले नाहंज्ञानुमितिप्रतिपक्षविषयतां निवेश्य सिद्धेः प्रतिबध्यप्रतिबंधकभावो न
एपत्तिरिति। तस्मादितरभेदत्वप्रकारकज्ञानकालीनव्यतिरेकव्याप्तिजन्यानुमितौ विशिष्टवैशिष्ट्यविषयतास्वी
कारस्यावश्यकः। तत्साधारणं च विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकस्यावश्यकं। तथा सति
नेतरभेदत्वप्रकारकारकजन्यधूमकाले विशेष्ये विशेषणमिति रीत्या इतरभेदत्वप्रकारकाद्विविधविष
यताशाल्यनुमित्यापत्तिः। विशिष्टवैशिष्ट्यानवगाहिन्या विशेष्ये विशेषणमिति रीत्या जायमानाया अनुमि
तेरप्रसिद्धेः। विशिष्टवैशिष्ट्यावगाहिन्यां च तस्या विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वादिति
चेदेवमपि अनुमितौ स्वातंत्र्येणैव हेतुत्वात् अनुमितिसाधारणानुभवत्वस्य जन्यतावच्छेदकत्वे नित्यस्या

प्रकारकज्ञाने ३

तावद्

वि॰ शि॰ वच्छेदेनाप्यनुमत्त्वमिति वैशिष्ट्यावगाहकत्तया मिथो विशेषणविशेष्यभावे नियमनाविरहेण कार्यकारणभावद्वयस्यावच्छेदकत्वा

७ त्तु अवच्छेदकगौरवाच्चेत्याहुः॥ परे तु अनुभवत्वादिकमनिवेश्य विशिष्टवैशिष्ट्यविषयत्वमेव तदवच्छेदकमाश्रीयते

विशेषणतावच्छेदकनिर्णयस्य पूर्वकालीनस्मरणेऽस्य स्थाने च विशेष्ये विशेषणमिति तादृशविषयतामात्रमभ्युप

यते अतो न व्यभिचारो नवा निरसमाधारांप इति वदन्ति। केचित्तु विशेषणतावच्छेदकप्रकारकसंशयकालविशिष्टवैशिष्ट्य

बोधं स्वीकृत्य निर्णयत्वमनिवेश्य विशेषणतावच्छेदकप्रकारकज्ञानत्वेनैव हेतुत्वं कल्पयन्ति। तदसत्। संशय

साधारणज्ञानस्य हेतुत्वे प्रामाण्यनिर्णयस्यैवोत्तेजकतया निर्णयत्वेन हेतुत्वे चाप्रामाण्यज्ञानसामान्यस्यैव

तेथात्वेन निर्णयत्वेन हेतुत्वकस्य न स्यैवोचितत्वात्। अन्यथा विशेषणतावच्छेदकप्रकारकज्ञानीयनिर्णयत्वापेक्षया गुरुशा

रीरस्याप्रामाण्यज्ञानीयनिर्णयत्वस्य प्रवेशे महागौरवप्रसंगात्। अथ विशेषणतावच्छेदकप्रकारकसंश

यकाले तत्र चाप्रामाण्यशंकायां भवन्मतेऽपि विशिष्टवैशिष्ट्यबोधानंगीकारात् अप्रामाण्यज्ञानत्वावच्छि

न्नाभावो विशेषणतावच्छेदकप्रकारकज्ञानहेतुतायां निवेश्यते न तु निर्णयत्वघटितगुरुशरीरावच्छिन्नाभाव इति चेद् श्री

एवमपि संशयसाधारणज्ञानस्य विशिष्टवैशिष्ट्यबोधहेतुत्वे अनुमित्यादिकं प्रति परामर्शहेतुत्वे वह्निव्याप्य ७

हानस्य २

धूमवान्पर्वतः वह्निव्याप्यधूमवन्महानसमित्याद्यनेकविधज्ञाने व्याप्यांशे निर्णयत्वनिवेशो गौरवं। अस्माकं तु तत्र व्या
प्तिविशिष्टवैशिष्ट्यावगाहिज्ञानत्वादिना हेतुत्वस्वीकारात्। विशेषणतावच्छेदकांशे संशयात्मकाद्विशि
ष्टवैशिष्ट्यबोधाप्रसिद्ध्या व्याप्यांशे निर्णयत्वनिवेशोपि सति विरहात्। न चाहार्यविशेषणता
वच्छेदकप्रकारकनिर्णयाज्ज्ञातस्य पक्षस्य विशेषणतावच्छेदकांशे संशयात्मकज्ञानस्य विशिष्टवैशिष्ट्यविषयताशा
लित्वे बाधकाभावात्। ताहृशज्ञानेनानुमितिवारणाय विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन विशिष्ट
वैशिष्ट्यबोधहेतुत्वादिनापि परामर्शहेतुतायां व्याप्यांशे निर्णयत्वमवश्यं निवेश्यमिति न लाघव
मिति वाच्यं अनाहार्यविशेषणतावच्छेदकप्रकारकनिर्णयत्वेन विशिष्टवैशिष्ट्यबोधहेतुत्वाभ्युपगमात्। अत
एव विशिष्टवैशिष्ट्यबोधे अनुमितिलक्षणातिव्याप्तिः साधु संगच्छते। अन्यथानुमितिजनकतावच्छेदककोटौ अ
नाहार्यत्वनिवेशे विशिष्टवैशिष्ट्यबोधहेतुतायां तदनिवेशे एकरूपेण हेतुत्वाभावात् तत्रातिव्याप्ति
शंकाया असंगतत्वापत्तेः। न च विशेषणतावच्छेदकप्रकारकज्ञानहेतुतायां अनाहार्यत्वस्य निर्णयत्वं च निवेशा स्य२
पेक्षया परामर्शहेतुतायां व्याप्यांशे निर्णयत्वनिवेशनमेवोचितमिति वाच्यं। वह्निव्याप्यधूमवान्पर्वतः

वि॰वै॰ वह्निव्याप्यधूमवन्न्यहानसमित्साधनैकविधज्ञानहेतुतायां निर्णयत्वनिवेशापेक्षया धूमो वह्निव्याप्य इत्याका
८ रैकैकविधज्ञानस्य हेतुतापातन्निवेशे लाघवात्। न च धूमो वह्निव्याप्य इत्याकारकसामानाधिकरण्यप्रमा
8 त्रावगाहिनिर्णयद्वयोः सामानाधिकरण्येन व्याप्यभावभाने बाधकाभावात् धूमत्वसामानाधिकरण्ये [redacted]
न व्याप्यभावकोटिकसंशयस्यापि विशिष्टवैशिष्ट्यविषयताशालित्वात् तत्र हेतुत्वेऽनुमितिवारणाय व्याप्यसं
शे निर्णयत्वनिवेशनमावश्यकमिति वाच्यं विशेष्यतावच्छेदकसामानाधिकरण्येनोभयकोटिकावगाहिज्ञा
ने संशयत्वाभावात् तादृशज्ञानादनुमितिस्वीकारे क्षत्यभावात्। न च धूमत्वसामानाधिकरण्येन व्याप्तिनिर्णयानन्त प्रकारकनि॰
नीत ५ रोत [redacted] धूमत्वावच्छेदेन व्याप्यत्वावगाहिनो धूमत्वसामानाधिकरण्येन व्याप्यभावावगाहिनः संशयादनुमितिस्तस्या
वादिना ४ होवारयितुमशक्यः। जैन तादृशज्ञाने व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वस्वीकारादिति वाच्यं॥ अवच्छे
दकावच्छेदेन व्याप्तिप्रकारकविशिष्टवैशिष्ट्यावगाहिबोधेऽवच्छेदकावच्छेदेन व्याप्तिप्रकारक [redacted] स्य हेतु
त्वात्। अवच्छेदकावच्छेदेन निर्णयसत्त्वे च धूमत्वं विशेष्यतावच्छेदकीकृत्य व्याप्यभावभानासंभवात्। न चैवमपि धूमो श्री
वह्निव्याप्य एतादृशज्ञानस्यैव निर्णयत्वेन हेतुत्वमायातं। एकदण्डवायुरूपएतादृशादिशिष्टवैशिष्ट्य ८

इति २

स ४

निर्णप ३

० तादृशसामग्री प्रतिबंधकत्वे कल्पनीये तत्र विषयमनिवेश्यानुमितित्वावच्छिन्नं प्रति एव प्रतिबंधकत्वं कल्पनीयं सामग्री प्रतिबंधकत्वे कल्पनाधिक्यमिति भावः ०

गेयस्थलीयहेतुतायां निर्णयत्वनिवेशे युक्तिविरहः इति वाच्यं दंडो रक्त इत्याकारकज्ञानस्य निर्णयत्वेन हेतुत्वे रक्तत्व विशिष्टदंडादिहेतुकानुमितेर्जनकतावच्छेदकपरामर्शहेतुतायां हेतुतावच्छेदकीभूतरक्तत्वांशे निर्णयत्वानिवेशे नलाघवात् । विशिष्टवैशिष्ट्यविषयतायां तन्निवेशेन तद्व्याससंशयात्मकपरामर्शादनुमित्यापत्तेरसंभवात् । वस्तुतस्तु विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकज्ञानत्वेन हेतुत्वे इच्छाविशिष्टतादृशविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षसामग्रीकाले दंडो न रक्त इत्याकारकानुमितिशाब्दबोधवारणाय तादृशानुमित्यादौ तथाविधसामग्र्याः प्रतिबंधकत्वकल्पने गौरवं । अस्माकं तु तादृशसामग्रीकाले रक्तो दंड इत्याकारकनिर्णयस्य नियमतः सत्वात् तादृशनिर्णयस्य बाधमुद्रया तथाविधानुमितिप्रतिबंधकतया न तादृशसामग्री प्रतिबंधकतायाः कल्पनात् । न च तादृशसामग्रीकाले घटानुमितिवारणाय तत्र तादृशसामग्रीत्वावच्छिन्नं प्रत्येव तथा कल्पनात् न तदतिरिक्तप्रतिबंधकताधिक्यमिति वाच्यं इच्छाप्रयोजनकत्वानुरोधेन विशिष्टप्रतिबंधकतायाः आवश्यकत्वात् इति । एतेन परामर्शहेतुतायां विशिष्टवैशिष्ट्यबोधविषयतानिवेशे पि निर्णयत्वनिवेश आवश्यकः । अन्यथा धूमो वह्निव्याप्य इति निर्णयानंतरं व्याप्यभाव प्रत्यक्षे इच्छावलात् व्या

विशिष्ट्य २

भाविलं २

वि०वे० स्वभावावगाहिनः संशयात्मकव्याप्यवत्ताज्ञानादनुमित्यापत्तेः। तादृशज्ञानस्य तत्पाविध[redacted]विषयताशालित्वेबा
९ धकाभावादिति न लाघवावकाशइति प्रागुक्तरीत्यावत्ताप्युक्तलाघवापरिहारादिति अत्राहुः संश
योत्तरं विशिष्टवैशिष्ट्यबोधानभ्युपगमेपि विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारक
१ निर्णयत्वेन हेतुत्वमनर्थकं। दंडो रक्तो न वेति संशयानन्तरं रक्तदंडवानिति विशिष्टवैशिष्ट्यबोधवारणाय
तादृशविशिष्टवैशिष्ट्यबोधं प्रति दंडत्वधर्मितावच्छेदककरक्तत्वाभावप्रकारकज्ञानाभावत्वेन हेतु
पं१ त्वकल्पनात्। संशयानन्तरं निर्णये सति क्षणविलंबेन विशिष्टवैशिष्ट्यबोधः। न च तादृशकारणताद्वयक
ल्पनापेक्षया लाघवाद्दंडत्वधर्मितावच्छेदककरक्तत्वप्रकारकनिर्णयत्वेन पृथक्हेतुत्वकल्पनं स्यादिति वा
च्यं दंडत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वाभावप्रकारताप्रसिद्धत्वे सति दंडत्वावच्छिन्नविशेष्यतानिरूपि
तरक्तत्वप्रकारताशालिज्ञानत्वरूपनिर्णयत्वेन हेतुत्वे तादृशप्रकारताप्रसिद्धत्वतादृशप्रकारताशा
लिज्ञानत्वयोर्मिथो विशेषणविशेष्यभावविनिगमनाविरहेण षट्कार्यकारणभावापत्तेः। अवच्छेदक श्री
गौरवाच्च। मन्मते तादृशरक्तत्वाभावप्रकारकज्ञानाभावस्य हेतु[redacted]यां तादृशरक्तत्वाभावप्रकारक ९
ता१

८ स्विनिगमनाविरहेण ~~विनिगमनाद्य~~ भावद्वयं। रक्तत्वप्रकारकज्ञानहेतुतायां रक्तत्वप्रकारकत्वज्ञानत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण चद्वयमिति १
कार्यकारणता २ ~~विनिगमनाविरहेण~~

त्वज्ञानत्वयोर्विशेषणविशेष्यभावेन द्वयमिति कार्यकारणभावचतुष्टयकल्पनात् त्र पक्षे दकघंवोल्या च्चैवेति।
। एवं रक्तदंडवद्भूतलवान् रक्तदंडवत्तुरूपवानित्यादिविशिष्टवैशिष्ट्यबोधे रक्तदंडवद्भूतलमित्यादिबहुविधज्ञा
३ तायां २ न संदेहस्तु [redacted] दंडत्वधर्मितावच्छेदककरक्तत्वाभावप्रकारकान्यत्वरूपनिर्णीयत्वस्य निवेशेन भवन्मते गौरवं।
मन्निवेशे रक्तत्वांशे संशयात्मकतादृशज्ञानानन्तरं तादृश [redacted] बोधापत्तिः। न च भवता तादृशविशिष्टवै
शिष्ट्यबोधेऽपि तथाविधसंशयस्य प्रतिबंधकत्वं कल्पनीयमिति वाच्यं। मन्मते रक्तत्वविशिष्टवैशिष्ट्याव
गाहिज्ञानत्वावच्छिन्नं प्रति दंडत्वधर्मितावच्छेदकरक्तत्वाभावप्रकारकज्ञानस्य रक्तदंडवानित्याकारकज्ञान क ६
स्थले प्रतिबंधकताकल्पनात् तत्प्रतिबध्यतावच्छेदकीभूतविषयतायाः स्वव्यापकतया तादृशसं [redacted] यकाल
व्यापकधर्मावच्छिन्नसामग्र्यभावादेव रक्तदंडवद्भूतलवान् देश इत्यादिविशिष्टवैशिष्ट्यबोधासंभवात् तद्वारणा
यतत्र रक्तत्वाभावप्रकारकज्ञानस्य प्रतिबंधकत्वानतराकल्पनात्। किं तु रक्तदंडवद्भूतलवानित्यादिबोधे रक्तदं
डाभावप्रकारकज्ञानमात्रस्य प्रतिबंधकत्वकल्प [redacted]। न च मन्मतेऽपि रक्तदंडवानितिविशिष्टवैशिष्ट्यबोधे दं
डभूतदंडत्वधर्मितावच्छेदककरक्तत्वप्रकारकनिर्णयत्वस्यतावच्छेदकीभूतविषयताया रक्तदंडवद्भूतलं

वि॰शि॰ इत्यादिनिर्णयजन्यतावच्छेदकीभूतविषयतायाव्यापकत्वं यारक्तत्वांशे संशयकाले व्यापकधर्मावच्छिन्नसामग्रीविर
१० हादेव न रक्तदंडवद्भूतलमितिसाहित्यनिर्णयजन्यतावच्छेदकावच्छिन्नापत्तिरिति रक्तदंडवद्भूतलमितिज्ञानदेशजायां
नवरक्तत्वाभावप्रकारकान्यत्वनिवेशप्रयोजनं इति वाच्यं रक्तत्वांशे संशयात्मकरक्तदंडवद्भूतलमितिज्ञानानंतरं दं
10 डो रक्त इति निर्णयोत्पन्नो रक्तदंडवद्भूतलवानिति विशिष्टवैशिष्ट्यबोधापत्तेः। तदानीं रक्तत्वविशिष्टदं
डवैशिष्ट्यावगाहिज्ञानहेतुभूतस्य दंडो रक्त इति निर्णयस्य दंडांशे निर्णयात्मकस्य रक्तदंडवद्भूतलमितिज्ञा
नस्य च सत्त्वेन सकलकारणसमवधानात्तेन तादृशरक्तत्वाभावज्ञानस्य समवायेन विशिष्टवैशिष्ट्यावगाहिबु
द्धिं प्रति समवायेन न प्रतिबंधकता। कायव्यूहस्थले एकशरीरावच्छेदेन रक्तो न वे[illegible]त्यादिसंशयव दंडे ५
३९ ति शरीरान्तरावच्छेदेन रक्तदंडवानिति विशिष्टवैशिष्ट्यबोधोदयेन व्यभिचारात्। नाप्यवच्छेदकतासंबंधेन तादृ
शविशिष्टवैशिष्ट्यबोधं प्रति अवच्छेदकतया तथाविधज्ञानत्वेन प्रतिबंधकत्वं परपुरप्रवेशस्थले तच्छरीरावच्छे
देन अभिमानाभावदशायां तथाविधसंशयसत्त्वे तदवच्छेदेनैव तदात्मनि विशिष्टवैशिष्ट्यबोधोदयेन व्यभिचा श्री
रात्। नायत्सावच्छेदकतासंबंधेन तदात्मसमवेततादृशविशिष्टवैशिष्ट्यबोधं प्रति अवच्छेदकतासंबंधे १०

नत्वादात्मसमवेततादृशरक्तत्वाभावप्रकारकज्ञानत्वादिनाप्रतिबंधकत्वं कल्पनीयं इति पुरुषभेदेनानंतप्रतिबध्य
प्रतिबंधकभावापत्तिः। अतः प्रतिबंधकत्वकल्पनोपस्थापालाघवात्समवायेन विशिष्टवैशिष्ट्यबुद्धिं प्रति विशेष
णतावच्छेदकप्रकारकज्ञानस्य समवायेन हेतुतायां संशयान्यत्वप्रवेशः समुचित इत्यपि परास्तं। निश्चयत्वेन
हेतुत्वे रक्तदंडवद्भूतलवानित्यादि विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकज्ञानस्यान्य
तलाघवं तत्तद्विषयभेदेनानंतहेतुतायां रक्तत्वाभावाप्रकारकत्वादिरूपनिर्णयत्वनिवेशेन विशेष्यविशेषणभावे वि
निगमनाविरहेणानंतकार्यकारणभावापत्तेः। न च मन्मतेपि रक्तदंडवद्भूतलवानिति विशिष्टवैशिष्ट्यबोध
हेतुतायां दंडत्वधर्मितावच्छेदककारक्तत्वाभावप्रकारकान्यत्वरूपसंशयान्यत्वनिवेशपतो रक्तविशि
ष्टवैशिष्ट्यबोधीयायां विषयतायां एव कारणतावच्छेदककोटिप्रवेशेन स्कांशसत्राय वत तथाविधविषयता
यात्रभावेनैवापत्त्यसंभवादिति वाच्यं। विशकलितोपस्थितिमूलकात् रक्तदंडवद्भूतलं इत्यादिज्ञानाद
पि रक्तदंडवद्भूतलवान्देशादुत्याकारकविशिष्टबोधोदयेन रक्तदंडवद्भू● तलं इत्येतादृशविशिष्टवै
शिष्ट्यबोधत्वावच्छिन्नाकारणतायाः कस्यचित्तमत्राकल्पत्वात्। तथा च तादृशसंशयात् रक्तदंडवद्भूतल

वि०शि० वान्देशइत्याकारकविशिष्टवैशिष्ट्यबोधवारणाय रक्तत्वांशे निर्णयत्वनिवेशस्यावश्यकत्वमिति। अथ विशिष्टवैशिष्ट्यबोधं
११ प्रतिविशेषणतावच्छेदकाभावप्रकारकज्ञानस्य प्रतिबंधकत्वे भिन्नविषयकानुमित्यादिकं प्रतिइच्छाघटितविशि
ष्टवैशिष्ट्यबोधसामग्र्याः प्रतिबंधकतायां इच्छाविशिष्टतत्कारणविशिष्टरंडत्वधर्मितावच्छेदककरक्तत्वाभाव
प्रकारकज्ञानाभावत्वादिना प्रतिबंधकत्वकल्पनात्। तत्र च तादृशज्ञानाभावस्य सामानाधिकरण्येन रक्तत्वप्र
कारज्ञाने इच्छायां तत्कारणे च वैशिष्ट्यं निवेश्यते इत्यत्र विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकयोरपि नरक्तत्वप्रका
रकज्ञाने इच्छायां तत्कारणे भावबाहुल्यं। मन्मते तु पुनरिच्छाविशिष्टरक्तत्वाभावाप्रकारकरंडत्वधर्मितावच्छे
दककरक्तत्वप्रकारकज्ञानत्वेन तथात्वकल्पनात्। तथा च रक्तत्वाभावाप्रकारकत्वस्य रक्तत्वप्रकारकज्ञाने त
राविशेषणत्वेन आपत्त्यसंभवात् विनिगमकमस्तीति लाघवं। एवं मन्मतेपि सामग्र्याः प्रतिबंधकतायां निर्ण
यत्वावच्छिन्नस्यैव निवेशोभ्युपेयते न तु रक्तत्वाभावप्रकारकज्ञानाभावस्येति वाच्यं। रक्तो दंडो न वेति संशयानं
तरं रक्तो दंड इति निर्णयमते विशिष्टवैशिष्ट्यबोधापत्तेः भवन्मते संशयेन प्रतिबंधात्। विशिष्टवैशिष्ट्यबोधा श्री
नुदयात् अनुमित्यादिरेकस्यसाव्यभिचारादिति चेन्न तथापि विशेषणतावच्छेदकप्रकारकनिर्णयत्वेनदे ११

न्तत्वेपरामर्शादिकारणतायां व्याप्त्याद्यंशे निर्णयत्वनिवेशो नानुमितिसामग्र्यादेः प्रतिबंधकतायां तादृशसामग्रीघ
टकविशिष्टपरामर्शे व्याप्त्याद्यभावाप्रकारकत्वादेः प्रवेशे नैगौरवात्। मन्मते तु विशिष्टवैशिष्ट्यविष
यताभावेनैवोपपत्तौ तदंशे निर्णयत्वानिवेशात्। भवन्मते पूर्वोक्तदिशा संशयेपि तादृशविषयतासत्त्वे बाधका
भावेन तादृशविषयतानिवेशेपि निर्णयत्वनिवेशं विनाऽनुपपत्तेः। न च भवन्मतेपि विशेषणतावच्छेदके निर्णयकाली
नेच्छाजन्यसंशयस्य विशिष्टवैशिष्ट्यावगाहित्वे बाधकाभाव इति वाच्यं। मन्मते विशेषणतावच्छेदकाभावप्रका
रकज्ञानाभावस्य कार्यकालवृत्तित्वाद्विशिष्टवैशिष्ट्यबोधहेतुताभ्युपगमात् संशयोत्पत्तिकाले च तदभा
वसत्त्वादेव तस्य विशिष्टवैशिष्ट्यावगाहित्वानुपपत्तेः। अपरं च विशेषणतावच्छेदकसंशयस्याप्रतिबंधकत्वे दंडो
नरक्त इत्याकारकशाब्दबोधसामग्रीकाले रक्तदंडवान् इति विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षवारणाय तादृशसाम
ग्र्यास्तथाविधप्रत्यक्षं प्रति प्रतिबंधकत्वकल्पने गौरवं। मन्मते तादृशशाब्दबोधसामग्रीकाले दंडत्वधर्मितावच्छेदककरक्तत्वाभावप्रकारकयोग्यताज्ञानेन नियतसत्त्वात् तस्य प्रतिबंधकत्वेनैवोपपत्तेः। तथाविधसामग्र्याः प्रति
बंधकत्वाकल्पनात्। अथ मन्मतेपि तदानीं विशेषणतावच्छेदकनिर्णयाभावादेव विशिष्टवैशिष्ट्यबोध[illegible]ना

तादृशशाब्दबोधेच्छासत्त्वे

प्रकारक५

ति २

पत्तिः। विशेषणतावच्छेदकप्रकारकनिर्णयसत्वे च तादृशशाब्दबोधं प्रति प्रतिबंधकबाधबुद्धेरेव सत्वान्न शाब्दसामग्र्य
१२ वनास्तीति न च दंडत्वसामानाधिकरण्येन रक्तत्वनिर्णयस्य दंडत्वसामानाधिकरण्येन रक्तत्वाभावशाब्दबोधाप्रतिबंधकत्वा
12 द्दंडत्वसामानाधिकरण्येन रक्तत्वनिर्णयकाले रक्तत्वाभावज्ञानसत्वे च दंडत्वसामानाधिकरण्येनैव
रक्तत्वाभावशाब्दबोधस्यैवोत्पत्तेः शाब्दसामग्र्याः प्रतिबंधकत्वाभावरूपकमिति वाच्यं। तद्दंडे नीलत्वन्मते पि विशि
ष्टवैशिष्ट्यबोधे दंडत्वसामानाधिकरण्येन रक्तत्वभाने बाधकाभावात् दंडत्वसामानाधिकरण्येन रक्तत्वावगाहिविशिष्टवैशि
रक्तत्वाभाव ष्ट्यबुद्धिं प्रति अवच्छेदकावच्छेदेन[illegible]ज्ञानस्यैव प्रतिबंधकताया भवतावाच्यत्वात्। दंडत्वसामानाधिकरण्येन र
क्तत्वाभावशाब्दबोधसामग्र्या दंडत्वसामानाधिकरण्येन रक्तत्वावगाहिविशिष्टवैशिष्ट्यबुद्धिं प्रतिबंधकत्व
दंडत्वा कल्पनस्य भवतोप्यावश्यकत्वादवच्छेदेन विशिष्टवैशिष्ट्यबोध[illegible]जनकस्य दंडत्वावच्छेदेन रक्तत्वप्रकारकनिर्णयस्य सत्वे
त्तु बाधान्न शाब्दबोधसंभवनोत्पद्यते इति चेन्न। शाब्दबोधे योग्यताज्ञानस्य हेतुतामते बाधबुद्धेः प्रतिबंधकता।
कल्पनात् दंडो रक्त इति ज्ञानकाले भिन्नेंद्रियादिजन्य च कथंचिद्दंडत्वावच्छेदेन रक्तत्वाभावज्ञाने शाब्दसा श्री
मग्रीकाले दंडो न रक्त इति शाब्दबोधस्यैवोदयात् तत्र रक्तदंडवानिति विशिष्टवैशिष्ट्यबोधवारणाय दंडत्वावच्छे १२

दृष्टेनरक्तत्वाभावशाब्दसामग्र्यास्तादृशविशिष्टवैशिष्ट्यबोधेप्रतिबंधकताकल्पनसंभवतोप्यावश्यकत्वात्। नचतत्
द्दंडेनीबाधेनप्रतिबंधाद्दंडेनविशिष्टवैशिष्ट्यबोधःस्यादितिवाच्यं। लौकिकसन्निकर्षजन्यज्ञानस्यबाधसामान्यप्रति
बध्यतयात्रानुमानिकादियोग्यताज्ञानघटितशाब्दसामग्रीकालेलौकिकसन्निकर्षजन्यविशिष्टवैशिष्ट्यबोध
स्यासंशयात्मकयोग्यताज्ञानानंतरंरक्तोदंडइतिनिर्णयेशाब्दबोधसकलकारणसमवधानेचविशिष्टवैशि
ष्ट्यबोधस्यचाप्रतिवारणायतादृशसामग्रीप्रतिबंधकतायाआवश्यकत्वात्। नचतादृशशाब्दसामग्री
कालेरक्तोदंडइतिप्रत्यक्षवारणायविशेष्यविशेषणतत्रापिचविशेषणांतरंइतिरीत्यारक्तदंडवानितिप्र २८
त्यक्षस्यचवारणायशाब्दसामग्र्याःप्रतिबंधकत्वावश्यकत्वेसर्वसाधारणदंडत्वधर्मितावच्छेदककरक्तत्वप्रकारक
प्रत्यक्षत्वस्यैवतत्प्रतिबध्यतावच्छेदकत्वाभ्युपगमात्विशिष्टवैशिष्ट्यबोधस्यापत्त्यसंभवात्। विशिष्टवैशिष्ट्यबोधं
प्रतिप्रतिबंधकत्वांतरमयापिनकल्पनीयमितिवाच्यं। दंडत्वावच्छिन्नमुख्यविशेष्यकरक्तत्वप्रकारकज्ञानं
जायतामितीच्छाकालिकेच्छायाउत्तेजकत्वानुरोधेनरक्तत्वप्रकारकदंडत्वावच्छिन्नमुख्यविशेष्यकज्ञानत्वस्यैवदं
डोरक्तइत्याकारकज्ञानापत्तिवारकप्रतिबंधकतानिरूपितप्रतिबध्यतावच्छेदकत्वस्वीकारात्। तादृशप्रतिबध्यप्र

वि॰शि॰ प्रतिबंधकाभावेनविशिष्टवैशिष्ट्यबोधापत्तिवारणस्यासंभवात्।मुख्यविशेष्यतायामनिवेशेकिंचिद्विशेष्यकरक्तदंडप्र
१३ कारकज्ञानंजायतामित्याकारकेच्छाधीनेतादृशशाब्दसामग्रीकालीनेरक्तदंडवानितिबोधेपूर्वोक्तेच्छाविरहेविशि
ष्टशाब्दसामग्र्यभावस्यव्यभिचारात्।तादृशेच्छायाश्चापित्वेनोत्तेजकत्वेपुरुषादिभासकसामग्र्यसत्वेतादृ
13 शेच्छावलादक्तोदंडइतिप्रत्यक्षप्रसंगात्।एवंविशेष्येविशेषणंतत्रापिचविशेषणांतरमितिरीत्याज्ञायमा
नतादृशप्रत्यक्षस्थलीयप्रतिबंधकतयाविशिष्टवैशिष्ट्यबोधापत्तिवारणंनसंभवति।विशेष्येविशेषणमिति
रीत्यावगाह्यजायतामित्याकारकेच्छायास्तत्रोत्तेजकतायाआवश्यकत्वेननतादृशेच्छांविनापिविशिष्टवैशिष्ट्याव
गाहित्वप्रकारकेच्छाधीनविशिष्टवैशिष्ट्यबोधेदृश्येनव्यभिचारात्।तद्वारणायविशिष्टवैशिष्ट्यबोधीयविष
यतासूक्ष्मतादृशावच्छे।घावच्छेदकभावापन्नविषयताशालिप्रत्यक्षत्वस्यतद्व्यावर्तनविलक्षणविषयताशा
लिप्रत्यक्षत्वस्यवातादृशेच्छाविरहेविशिष्टसामग्रीप्रतिबध्यतावच्छेदकतायाआवश्यकत्वात्।विशिष्टवैशि श्री
ष्ट्यावगाहित्वप्रकारिकेच्छायाश्चापित्वेनोत्तेजकत्वेविशेषणतावच्छेदकप्रकारकनिर्णयस्यकालेतादृ
शेच्छावलात्तविशेष्येविशेषणमितिरीत्यारक्तोदंडवानितिबोधापत्तिः।तथाचविशिष्ट्यावगाहित्वप्र १३

कारकेच्छाऽगोजनकीभूतविशिष्टवैशिष्ट्यबोधे स्यात् तत्प्रतिबध्यप्रतिबन्धकभावकल्पनमावश्यकमेव एवं तादृशशब्दाद्बो
धं प्रति तथाविधसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवं मन्मते तादृशशाब्दसामग्रीकाले रक्तत्वाभावज्ञानाभावघ
टितविशिष्टवैशिष्ट्यबोधसामग्र्याः अभावेन तादृशविशिष्टवैशिष्ट्यबोधसामग्रीकाले च योग्यताज्ञानघटित
तादृशशाब्दसामग्र्याघसत्त्वेन तादृशसामग्र्योर्मिलनासम्भवात् तथाविधप्रतिबध्यप्रतिबन्धकभावस्याकल्पना
त्। अथ वा बाधबुद्धेः शाब्दसाधारणपरोक्षज्ञानत्वावच्छिन्नं प्रति प्रतिबन्धकत्वं कल्प्यते तदा विशेषणतावच्छेदक
प्रकारकनिर्णयत्वेन हेतुत्वमते पि दण्डत्वावच्छेदेन रक्तत्वावगाहि रक्तदण्डवानिति विशिष्टवैशिष्ट्यबोधसामग्र्याः दं
डो न रक्त इति शाब्दबोधसामग्र्या अमिलनासम्भवात्तादृशप्रतिबध्यप्रतिबन्धकभावाकल्पनान्न गौरवावकाशइ
ति चेन्न नाम रूपवत् गौरवात् तथापि रक्तत्वाभाववद्दण्डवानु इत्याकारकविशिष्टवैशिष्ट्यावगाहिमात्रस्य गोचरेच्छाविशि
ष्टतादृशविशिष्टवैशिष्ट्यबोधात्मकमानससामग्रीकाले रक्तो दण्डवान् पुरुष इत्याकारकचाक्षुषादि विशिष्टवैशि
ष्ट्यबोधवारणाय तादृशविशिष्टवैशिष्ट्यावगाहिचाक्षुषत्वप्रकारकेच्छाविरहविशिष्टतादृशविशिष्टवैशिष्ट्या
वगाहिमानसत्वप्रकारकेच्छाविशिष्टतादृशमानससामग्र्यास्तादृशचाक्षुषप्रति प्रतिबन्धकत्वकल्पने गौ

एवं तु परिहरमेयामन्यमतेन रक्तत्वाभाववद्दंडवान्पुरुष इत्याकारकविशिष्टवैशिष्ट्यबोधसामग्र्या रक्तत्वाभाववान्दंड
इत्याकारकविशेषणतावच्छेदकप्रकारकज्ञानघटिततया तादृशसामग्रीकाले तदापत्त्यसंभवात्। तस्मात्त
त्र प्रतिबंधकत्वाकल्पनात्। न चैतादृशविशिष्टवैशिष्ट्यबोधस्तादृशबोधे नैव प्रतिबध्यत इति न सामग्र्याः प्र
तिबंधकत्वं कल्प्यत इति वाच्यं। लौकिकसन्निकर्षजन्यतादृशज्ञानस्य बाधसामान्याप्रतिबध्यत्वात्। आनुमा
निकादि रक्तत्वाभावप्रकारकज्ञानकाले तदापत्तिरिति प्रागेवोक्तत्वात्। न च रक्तो दंड इत्याकारः। कनिर्णयघ
टितया रक्तदंडवान् इत्याकारकविशिष्टवैशिष्ट्यबोधसामग्र्याः सत्त्वाद्रक्तत्वाभाववद्दंडवान् इत्याकारकमान
ससामग्र्येवेन।। स्तितत्र रक्तो दंड इति ज्ञानस्य बाधमुद्रया प्रतिबंधकत्वादिति वाच्यं। इच्छाकाले बाधसत्त्वेपि आ
हार्यज्ञानोदयात् इच्छाविरहे विशिष्टबाधबुद्धेरेव च मानसादिप्रतिबंधकत्वात्। इतरदानीमिच्छासत्त्वेन बाध
बुद्धेरकिंचित्करत्वात्। अथ चैवं संशयस्य प्रतिबंधकतावादिनये रक्तदंडवानिति विशिष्टवैशिष्ट्यबोधरक्तत्वाभा
वद्धेतुकदंडपक्षकानुमितिसामग्र्याः प्रतिबंधकत्वं न कल्प्यते। तत्र तादृशसामग्रीकाले रक्तत्वाभावप्रका
रकज्ञानस्यावश्यसत्त्वेन तत एव तादृशविशिष्टवैशिष्ट्यबोधवारणसंभवात्। अपगुरुत्ववद्द्रव्यवान्देश

इत्याकारिकांनीद्रियविशेषणतावच्छेदकविशिष्टवैशिष्ट्यावगाहिबोधस्थलेगुरुत्वाभाववान्द्रव्यवान्इतिविशि
ष्टवैशिष्ट्यबोधमानसेच्छावैशिष्ट्यमानससामग्रीकालेबोधेनप्रतिबध्यतेइदंविशिष्टवैशिष्ट्यबोधकारणेतादृ
शसामग्र्याःप्रतिबंधकतायानिर्णयत्वेनहेतुत्त्वादिनापिअकल्पनादुक्तगौरवानवकाशात्।तत्रतथा
विधनिर्णयत्वेनहेतुत्वकल्पनमेवोचितं।अन्यथाऽनुमित्यादिकंप्रतिविशेषणतावच्छेदकाभावप्रकारक
ज्ञानाभावघटितविशिष्टवैशिष्ट्यबोधसामग्रीत्वेनप्रतिबंधकत्वकल्पनापत्त्यापूर्वोक्तगौरवादिति।नचभ
वन्मतेपियत्रविशेषणतावच्छेदकसंशयोत्तरक्षणेविशेषणतावच्छेदकनिर्णयोजातस्तत्रद्वितीयक्षणेऽन
नुगतानुमित्यादिसत्वेनानुमित्युत्पत्तिकालीनानानुत्पत्त्यांप्रत्यक्षेच्छाविशिष्टविशिष्टवैशिष्ट्यबोधसा
मग्रीप्रतिबंधकतायांउत्तेजकत्वस्यास्वीकर्त्तव्यमितिगौरवं।ममतुतादृशविशेषणतावच्छेदकाभावप्रकारक
ज्ञानाभावघटितविशिष्टवैशिष्ट्यबोधसामग्र्यभावादेवोपपत्तेःतादृशेच्छानामुत्तेजकत्वानभ्युपगमात्।तत्रा
नुमित्सोत्पत्तिक्षणेविशेषणतावच्छेदकसंशयस्यनाशात्तादृशसंशयाभावघटितविशिष्टवैशिष्ट्यबो
धसामग्र्याअपिसत्वेनतादृशेच्छानामुत्तेजकत्वमुभयवादिसिद्धमितिनाशंकनीयं।अपक्षाबुध्यात्मक

वि॰शि॰ त्मकसंशयकाले तादृशानुमित्सोत्पत्तिक्षणे तत्सत्वात् । तादृशानुमित्सादीनामुत्तेजकत्वाकल्पने मन्मते लाघव
१५ स्यापरिहारः । ज्ञानेच्छयोर्यौगपद्यानभ्युपगमे तादृशसंशयोत्पत्तिद्वितीयक्षणेऽनुमित्सादिगोचरेच्छाविशेषण
15 तावच्छेदकप्रकारकनिर्णययोरुत्पत्तौ तद्व्यवहितोत्तरक्षणेऽनुमित्याद्युत्पत्तिप्रसङ्गस्तदनुरोधेन तादृशेच्छाया भ
वन्मत एवोत्तेजकत्वात् । मन्मते लाघवमस्तीति स्फुटत्वादिति वाच्यम् । यत्र विशेषणतावच्छेदकसंशयकाले वि
शेषणतावच्छेदकनिर्णयः विशिष्टवैशिष्ट्यावगाहिचाक्षुषादिगोचरेच्छायाः समवधानं तत्रानुगतघ
टमानसगोचरेच्छा तन्मानससामग्री तदनुमितिसामग्रीसमवधानात्तदा भवन्मते घटमानसोदयात् । अ
नुमितिसामग्र्याः प्रतिबन्धकत्वात् तन्मानसेच्छानामुत्तेजकत्वेन भवन्मते गौरवात् । अस्मन्नये च न शतौ । वि
शिष्टवैशिष्ट्यावगाहिचाक्षुषादेरेवोत्पत्त्या तादृशमानसानुदयेन तथाविधेच्छाया उत्तेजकत्वानभ्युपगमा
त् । एवं तदानीमनुमितिवारणाय तादृशमानसेच्छाविशिष्टमानससामग्र्या अनुमितिप्रतिबन्धकत्वकल्प
नेगौरवं । अस्मन्मते तु विशिष्टवैशिष्ट्यावगाहिचाक्षुषसामान्यादेः प्रतिबन्धकत्वादेवानुमितिवारणा श्री
दिति चेन्न । तादृशेच्छास्थले तादृशलाघवविरहेऽपि विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतु १५

त्वेपूर्वोक्तविनिगमनाविरहअपुक्तगौरवेण विशेषणतावच्छेदकाभावप्रकारकज्ञानप्रतिबंधकत्वस्यैवोचितत्वात्। न
च प्रागेवोक्तसंशयस्य प्रतिबंधकत्वनये विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावघटितविशिष्टवैशि
ष्ट्यसामग्र्याः प्रतिबंधकत्वकल्पनेनेगौरवमिति वाच्यं। तादृशसामग्रीप्रतिबंधकतायां विशेषणतावच्छेदकाभा
वप्रकारकज्ञानाभावनिवेशप्रयोजनविरहात्। न च विशेषणतावच्छेदकसंशयकालीनानुमितौ व्यभिचार इ
ति वाच्यं। अनुमित्साकाले अनुमित्सुत्वस्य इच्छाविशिष्टविशिष्टवैशिष्ट्यबोधसामग्रीरूपप्रतिबंधकाभा
वस्य व्यभिचारवारणायेच्छाया उत्तेजकत्वकल्पनापेक्षया लाघवात् तादृशसामग्र्यनुमितेर्ज्ञानत्वस्यैव कार्यतावच्छे
दकत्वाभ्युपगमात्। तादृशसंशयकालीनज्ञाने व्यभिचाराभावात्। न च तादृशविशिष्टवैशिष्ट्यबोधीयविशेष
णतावच्छेदकाभावप्रकारकज्ञानाभावेतरकारणसमुदायोत्तरोत्पन्नस्य तथाविधसंशयकालीनज्ञानस्य तादृ
शसामग्र्यभावव्याजन्यतावच्छेदकानाक्रान्तस्य प्रसिद्ध्या विशिष्टवैशिष्ट्यबोधसामग्र्युत्तरस्यापि तदापत्तिरि
ति वाच्यं। अनुमित्साविशिष्टानुमित्सादेरनुमित्सादीनामिव तादृशविशेषणतावच्छेदकाभावप्रका
रकज्ञानविशिष्टज्ञाने तादृशज्ञानस्यापि स्वातंत्र्येहेतुताकल्पनेनापत्त्यभावात्। न च तादृशस्वातंत्र्येहे

विश० १६ न्तुत्वकल्पनस्याधिक्यात् गौरवमित्याशंकनीयं भवन्मते गौरवस्यानिष्फलत्वात् । तादृशसामग्री प्रतिबंधकतायां निर्णे
यत्वनिर्णयत्वेन देहत्वात् । तं निर्युक्तिकमेव । इदं पुनरिहावधेयं । वह्निव्याप्यधूमवत् पर्वतवान् इति विशिष्टवैशिष्ट्य
16 बोधे विषयमनिवेश्य ज्ञानत्वेन च आत्मत्वेनैव वह्निहेतुता । न च घटादिज्ञानादपि तादृशविशिष्टवैशिष्ट्यबो
धापत्तिः । धूमलिंगकानुमितौ वह्निव्याप्यधूमवत्तानिर्णयत्वेन हेतुतायाः क्लृप्तत्वात् । तत्र चान्यलिंग
कानुमितौ व्यभिचारवारणाय तादृशनिर्णयविशिष्टत्वरूपधूमलिंगकत्वस्यावश्यं निवेशनीयतया सर्वत्र व्यभि
चारवारणसंभवेनानुमितित्वरूपवह्निविधेयत्वादेरपकत्वादेश्च निवेशप्रयोजनाभावात् । तादृशनिर्णयवि
शिष्टत्वं तज्जन्यतावच्छेदककमास्थीयते तादृशनिर्णयस्य विशेषसामग्रीत्वात् । एकदंडवान् पुरुष इत्यस्यापि स्था
नान्तरव्यूहेनैव निर्वाहः । यदि दंडो रक्तत्वभाववान् स्यादित्यापत्तिप्रतिबन्धापायव्यतिरेकज्ञानं कारणं । रक्तो दंड
इति दंडत्वधर्मितावच्छेदकीकृतरक्तत्वाभावाभाववान् इति वा तद्व्यभिचारभियारक्तदंड इति निर्णयविशि
ष्टत्वावच्छिन्नप्रति निर्णयत्वेन हेतुता । इत्थं च तादृशविशिष्टवैशिष्ट्यबोधस्यापि तज्जन्यतावच्छेदककोटौ श्री
तया स्वातन्त्र्येण तत्र तादृशनिर्णयत्वेन हेतुत्वकल्पनाविरहादिति । ज्ञानत्वेन सामान्यकारणताक १६

सनंचविशिष्टवैशिष्ट्यविषयतायाः आकस्मिकत्वापत्तिवारणायविशिष्टवैशिष्ट्यविषयताचविशेष्येविशे
षणमितिविषयताव्याप्याविशिष्टवैशिष्ट्यबोधसामग्रीकालेविशेषणज्ञानासंसर्गाग्रहादिघटितायाः
विशेष्येविशेषणमित्येतादृशविषयताशालिज्ञानसामग्र्याअवश्यंसंभवादितिवदन्ति।।किंचित्तुदण्डोर
क्तोनवेतिसंशयकालेरक्तदण्डवानित्यादिविशिष्टवैशिष्ट्यबोधोविशेष्येविशेषणमितिरीत्यापिनजायते
इतिधियिरक्ततापिरक्तदण्डवानित्येतादृशज्ञानानुदयादित्येवोक्तम्।तथाचतादृशबोधेसंशयस्यप्रतिबन्ध
कत्वमभ्युपेयम्।इत्थंचदण्डोरक्तोनवेतिसंशयद्वितीयक्षणेदण्डोरक्तइत्याकारकस्मरणादिसत्त्वेतृतीयक्ष
णेविशेष्येविशेषणमित्येतादृशविषयताप्रपन्नोरक्तोदण्डवानितिबोधः उत्पद्येतेतिनतादृशविषय
तयोर्व्याप्यव्यापकभावः संभवतीति।नचतादृशसंशयप्रतिबन्धकतायांनिर्णयस्योत्तेजकतयातादृशबोधस्य
विशेष्येविशेषणमितिरीत्यातादृशविषयताशालित्वबाधकाभावइतिवाच्यम्निर्णयस्योत्तेजकत्वेगौरवात्।
नचविशेष्येविशेषणमितिविषयताव्यापकत्वानभ्युपगमेरक्तदण्डाभाववान्पुरुषइत्यादिबाधदशायां
विशिष्टवैशिष्ट्यबोधापत्तिवारणायविशिष्टवैशिष्ट्यबोधंप्रतिबाधबुद्धेःप्रतिबन्धकत्वान्तरकल्पनेगौ)

वि०बो० स्वांशात्दृशाविषयतायाः व्यापकत्वे तादृशविषयताशालिज्ञानं प्रतिबाधबुद्धेः प्रतिबंधकतायाः न सत्त्वात्तन्नराभावोत्पत्तेः
१९ स्वातंत्र्येण प्रतिबंधकतायामकल्पनादिति वाच्यम् उभयसाधारणरक्तत्वप्रकारतानिरूपितदंडप्रकारतायामवच्छे
17 दकत्वेनैवोपपत्तौ तदव्यापकत्वेपि स्वातंत्र्येण प्रतिबंधकतायामकल्पनात्। न च दंडो रक्तो न वेति संशयानं
तरं विशेष्ये विशेषणमिति रीत्या रक्तदंडवानिति ज्ञानाभ्युपगमे क्षतिविरहेण संशयस्य प्रतिबंधक
त्वमेव नास्ति दीधितिस्थज्ञानपदं तु विशिष्टवैशिष्ट्यज्ञानपरमेवेति वाच्यम्। तादृशाबोधप्रतिसंशयस्य विरो
धितरक्तत्वाभावविशिष्टदंडपक्षकत्वमिति सामग्र्या विशेष्ये विशेषणमिति रीत्या बोधे प्रतिबंधकत्वाक
ल्पनात्। तथाविधसंशयस्य उभयप्रकारकत्वेन न विरोधिताकितरक्तत्वाभावप्रकारकज्ञानत्वेन। तथा च
तादृशसामग्रीकाले रक्तत्वाभावप्रकारकज्ञानस्याव्यापकतया तया तत्प्रतिबंधकतयैवोपपत्तौ सामग्री
प्रतिबंधकतायामकल्पने क्षतिविरह इति। न च तत्पक्षे रक्ताभावप्रकारकज्ञानत्वेन विरोधित्वे आनुमानि श्री
कादिरक्तत्वाभावप्रकारकनिर्णयदशायां रक्तदंडवानित्याकारकालौकिकप्रत्यक्षानुदयापत्तिरिति
वाच्यम् इष्टत्वात्। आनुमानिकाद्यबाधकाले रक्तो दंड इत्याकारकलौकिकप्रत्यक्षस्य सर्वस्वीकारात्। तत्र १०

विशेष्यविशेषणमितिरीत्या बोधे संशयप्रतिबंधकत्वस्य प्रामाणिकत्तया फलापलापाद्दर्लात्। न च विशिष्टवै
शिष्ट्यबोधसाधारणरक्तत्वप्रकारकत्वानिरूपितदंडप्रकारताशालिज्ञानत्वमेव प्रतिबध्यतावच्छेदकमस्तु।
तथा च संशयोत्तरोत्पन्ननिश्चयद्वितीयक्षणे विशिष्टवैशिष्ट्यबोधोपि न भवतीति तादृशविषयतयो
र्व्याप्यव्यापकभावोऽक्षत एवेति वाच्यं। तदानीं रक्तदंडवान् इत्येतादृशज्ञानस्य प्रामाणिकत्तयाऽपलापा
नर्हत्वात्। तदानीं फलानभ्युपगमेपि निर्णयत्वेन विशिष्टवैशिष्ट्यबोधं प्रति हेतुतया निर्युक्तिकत्वया
विशिष्टवैशिष्ट्यबोधेऽनुमितिलक्षणातिव्याप्तिशंकाया असंगत्यापत्तेः। न च विशिष्टवैशिष्ट्यबोधसा
धारणतादृशज्ञानत्वस्य संशयप्रतिबध्यतावच्छेदकत्वेपि निर्णयत्वेन हेतुत्वे निर्युक्तिकं। अप्रा
माण्यज्ञानास्कंदितसंशयकाले विशेष्यविशेषणमित्येतादृशविषयताशालिबोधोदयेन अ
प्रामाण्यज्ञानानास्कंदितसंशयस्यैव प्रतिबंधकतया अप्रामाण्यज्ञानास्कंदितसंशयकालेऽनिर्ण
यविशिष्टवैशिष्ट्यबोधापत्तिवारणाय विशिष्टवैशिष्ट्यबोधं प्रति निर्णयत्वेन हेतुतायां आवश्यकत्वा
दिति न ग्रंथासंगतिरिति वाच्यं। एतादृशयुक्त्या निर्णयत्वेन हेतुत्वेप्युक्तसंशयप्रतिबंधकत्वाभ्युपग

वि०बो० मेप्रयोजनविरहात्। अथसंशयानंतरंनिर्णयद्वितीयक्षणेफलापलापप्रसंगो मे। प्रामाण्यज्ञानमनुत्तेजकीकृ
१८ त्यरक्तत्वाभावप्रकारकज्ञानस्य स्वातंत्र्येण प्रतिबंधकतायाः कल्पयितुमुचितत्वात् निर्णयत्वेन हेतुत्वस्य। किं वि
18 लंबत्वात्। इति चेन्न। संशयानंतरं निर्णयसत्ति फलापलापस्यानर्हत्वात् तथाविधविशिष्टवैशिष्ट्यबोधः प्रामा
णिक एवेत्याहुः॥ केचित्तु तादृशबोधं प्रति संशयस्य रक्तत्वप्रकारकज्ञानत्वेनैव विरोधिता लाघवात् रक्तत्वप्रका
रकनिर्णयकाले च विशेष्यविशेषणमितिपर्यादविषयताशून्यस्यैव विशिष्टवैशिष्ट्यबोधस्योत्पत्तेः॥ इत्थं च तादृ
शविषयताविरहेऽपि विशिष्टवैशिष्ट्यविषयता। न च रक्तत्वाभाववद्दंडवानिति बोधे रक्तत्वाभावप्रकारकज्ञान
त्वापेक्षया लाघवेन रक्तत्वप्रकारकज्ञानत्वेनैव विरोधितायाः कल्पयितुमुचितत्वात् रक्तत्वाभावप्रकारकदंड
विशेष्यकनिश्चयोत्तरं जायमानो रक्तत्वाभाववद्दंडवानिति बोधस्तूभयविषयताशाली स्यादिति कथं वि
रुद्धेति वाच्यं। रक्तत्वप्रकारकज्ञानत्वेन तथात्वे रक्तत्वाभावाभावत्वावच्छिन्नकोटिकरक्तत्वाभावसंशयका
ले विशेष्यविशेषणमितिरीत्या तादृशबोधवारणाय रक्तत्वाभावाभावत्वावच्छिन्नप्रकारकज्ञानत्वेनापि प्रति श्री
बंधकत्वात् तस्य कल्पनीयतया गौरवात् उभयसाधारणरक्तत्वाभावप्रकारकज्ञानत्वेन विरोधितायाः एव कल्प १८

यितुमुचितत्वात् । तथा च संशयानंतरं रजतत्वाभाववान् इदं इति निर्णये सति विशिष्टवैशिष्ट्यबोधस्य तादृशो भव
त्वेव विशेष्ये विशेषणमिति रीत्या न भवति प्रतिबंधात् । अथ रजतं इदं वा न इदं इत्येतादृशबोधे रजतत्वप्रकारकज्ञा
नत्वेन विरोधित्वे रजतत्वाभावांशेऽप्रामाण्यज्ञानास्कंदितसंदेहकाले तादृशबोधानुदयापत्तिः । तदुपपत्त
ये च तादृशाप्रामाण्यग्रहस्य तत्रोत्तेजकत्वे तादृशाप्रामाण्यग्रहकालीनरजतत्वनिर्णयजन्यविशिष्टवैशि
ष्ट्यबोधस्य विशेष्ये विशेषणमिति तादृशविषयताशालित्वे बाधकाभावात् । एवं रजतत्वाभाववति रजतत्वप्र
कारकाप्रामाण्यग्रहविषयीभूतरजतत्वनिर्णयात्तत्रोत्तरं रजतं इदं वा न इदं इति ज्ञानस्यापि विशिष्टवैशिष्ट्यबोध
शालित्वाभावे तत्र विशेष्ये विशेषणमिति तादृशविषयतास्वीकारस्यावश्यकतया व्यभिचारः स्यात् । तद्वा
रणाय रजतत्वांशेऽप्रामाण्यज्ञानस्य रजतत्वप्रकारकज्ञानप्रतिबंधकतायामुत्तेजकत्वस्यावश्यकत्वात् । र
जतं न वा इदं इत्येतादृशसंशये रजतत्वांशेऽप्रामाण्यग्रहसत्त्वे विशेष्ये विशेषणमिति रीत्या बोधो न भवतीति
सर्ववादिसिद्धं ॥ भवन्मते तु तादृशाप्रामाण्यग्रहाभावविशिष्टरजतत्वप्रकारकज्ञानाभावसत्त्वात्तदापत्तिः । ए
वं द्विविधाप्रामाण्यग्रहस्योत्तेजकतया गौरवं । रजतत्वाभावप्रकारकज्ञानप्रतिबंधकतायां तु रजतत्वाभा

वांशेऽप्रामाण्यज्ञानेऽस्यैवावश्यकत्वेन लाघवमिति चेन्न। आरक्तत्वाभावांशेऽप्रामाण्यज्ञानानास्कंदितरक्तत्वाभावज्ञा
नत्वेन रक्तत्वांशेऽप्रामाण्यज्ञानानास्कंदितरक्तत्वप्रकारकज्ञानत्वेन च भिन्नप्रतिबंधकत्वस्य कल्प्यत्वे रक्त
त्वाभावविशिष्टदंडपक्षकानुमितिसामग्र्यादीनां रक्तत्वविशिष्टदंडपक्षकानुमितिसामग्र्यादीनां च प्रति
बंधकत्वाऽकल्पनेन लाघवादिति। इत्थं च तादृशविषयताद्वयसामानाधिकरण्येनोपपद्यत इति। अथ संश
यस्य तादृशविषयताशालिज्ञानविरोधित्वे दंडो रक्तो न वेत्यादिविशेषणसंशयाधीनरक्तदंडवान्न वेति
विशिष्टसंदेहस्य सर्ववादिसिद्धस्यानुपपत्तिरिति चेन्न। एवमपि तादृशबोधप्रतिरक्तत्वप्रकारकनिर्णयपु
त्वेनैव विरोधित्वमस्तु। उक्तसामग्रीप्रतिबंधकत्वाऽकल्पनेन लाघवान्नापि तादृशविषयतयोर्विरोधः स्यादेव
त्याहुः॥ अथ संशयनिर्विकल्पकोत्तरोत्पन्नज्ञानाद्विशेषणतावच्छेदकप्रकारकनिर्णयोत्तरोत्पन्नज्ञाने
स्य विलक्षणविषयतावत्वे अनुभवविवादाद्विशिष्टवैशिष्ट्यविषयतायां मानाभावः॥ अत्राहुः॥ विशि
ष्टवैशिष्ट्यविषयताभ्युपगमे परामर्शादिजनकतायां तादृशविषयतानिवेशो न स्यात् घटेशोनिर्णयत्वे श्री
न निवेशापत्तेरिति लाघवेन तत्सिद्धिः। न च पूर्वोक्तरीत्या संशयात्मकविशिष्टवैशिष्ट्यबोधस्याप्रसि १९

विशि° ष्ट्यनिश्चयत्वनिवेशश्चावश्यकः इति वाच्यं॥ एवमपि तादृशविषयेव्याप्तिनिश्चयोत्तरमिच्छाधीनव्याप्त्यभावा
१० वगाहिसंशयकाले श्चानुमितेरितरकारणसमवधानं कदापि नास्तीत्तत्र निर्णयत्वानिवेशने लाघवसंभवा
त्संशयस्य विरोधित्वाभ्युपगमे तु नैवानुपपत्तिरित्यपि संक्षेपः॥ ॥ इति श्रीमहोपाध्यायभट्टाचार्यरघुदेवविरचि
तो विशिष्टवैशिष्ट्यबोधविचारः समाप्तिमगमत् ॥ ॥ जगद्देवात्मजेन जयकृष्णेन लिखितोयं वासार्थं
कारपाम् ॥ भेरखसस ॥ ॥ ॥ ॥ ॥ श्री श्री श्रीरस्तु ॥ ॥ ॥ समंत १८० १२ मीति जेठ सुदी १५

20

श्री
२०

विवेकचन्द्र
५ ५०